# संस्कृतबालादर्शे सप्तविंशः पाठः ॥ २७ ॥

## कुक्कुटः

**उच्चैः** loudly, **तारम्** loudly with shrieking high note,

**प्रातस्तराम्** early in the morning, **पूर्वम्** before (morning)

चित्रेऽस्मिन् (अस्मिन् चित्रे) एकः कुक्कुटः द्वे कुक्कुट्यौ केचन शावकाश्च (शावकाः च) सन्ति। कुक्कुटस्य शिरसि ताम्रा चूडा वर्तते। तस्य वर्णश्चित्रो (वर्णः च चित्रः) रम्यश्च। कुक्कुट्या वर्णस्तु धूसरः (*a.m.* grey)। त्सयाः शिरसि ताम्रा चूडा न विद्यते। ते शावकाः सर्वदैव (सर्वदा एव) मात्रा सह पर्यटन्ति (परि अटन्ति) ॥

कुक्कुटाः प्राधान्येन धान्यकणान् भक्षयन्ति। ते पादाभ्याम् अवकरान् विकिरन्तो भक्ष्यम् अन्विष्यन्ति , चञ्च्वा चोद्धरन्ति (च उद्धरन्ति) ॥

कुक्कुटाः प्रत्यहं प्रातस्तरां (in the early morning) प्रबुध्यन्ते। उच्चैः क्रोशन्तः ते प्रत्यूषे सर्वान् प्राणिनः प्रबोधयन्ति। " उत्तिष्ठत जनाः, अलं निद्रया, प्रभाता रजनिः , चक्षुरुन्मीलयत (चक्षुः उन्मीलित), कवाटमुद्घाटयत (कवाटम् उद्घाटयत), सूर्योदयात् पूर्वं शय्यां त्यजत " इति वदन्त इव तारं रटन्ति ॥

कुक्कुटानां शब्दं श्रुत्वा केचिज्जनाः शयनादुत्थाय (शयनात् उत्थाय) स्वीयेषु कर्मसु प्रवर्तन्ते। कुक्कुटा रात्रौ यामे यामे विरुवन्तोवेलां बोधयन्ति ॥

क) प्रश्नाः - - -

१. चित्रेऽस्मिन् के के सन्ति ?

अस्मिन् चित्रे कुक्कुटः द्वे कुक्कुट्यौ केचन शावकाश्च सन्ति।

२. कुक्कुटस्य शिरसि किं वर्तते ?

कुक्कुटस्य शिरसि ताम्रा चूडा वर्तते।

३. तस्य वर्णः कीदृशः?

तस्य वर्णः चित्रः च रम्यः च।

४. कुक्कुट्या वर्णः कीदृशः ?

कुक्कुट्या वर्णः दूसरः (grey) ।

५. तस्याः शिरसि का न विद्यते ?

तस्याः शिरसि चूडा न विद्यते।

६. ते शावकाः कदा कया सह पर्यटन्ति ?

शावकाः सर्वदा एव मात्रा सह पर्यटन्ति।

७. कुक्कुटाः प्राधान्येन कान् भक्षयन्ति ?

कुक्कुटाः प्राधान्येन धान्यकणान् भक्षयन्ति।

८. ते कथं भक्ष्यमन्विष्यन्ति कया च उद्धरन्ति ?

ते पादाभ्याम् अवकरान् विकिरन्ते भक्ष्यम् अन्विष्यन्ति, चञ्च्वा च उद्धरन्ति।

९.	कुक्कुटाः प्रत्यहं कदा प्रबुध्यन्ते ?

कुक्कुटाः प्रत्यहं प्रातस्तरां प्रबुध्यन्ते।

१०.	किं कुर्वन्तः कान् प्रबोधयन्ति ?

कुक्कुटाः उच्चै क्रोशन्तः प्रत्यूषे सर्वान् प्राणिनः प्रबोधयन्ति।

११.	किं वदन्त इव तारं रटन्ति ?

"उत्तिष्ठत जनाः, अलं निद्रया, प्रभाता रजनिः, चक्षुः-उन्मीलयत, कवाटम्-उद्घाटयत, सूर्योदयात् पूर्वं शय्यां त्यजत" इति वदन्त तारं रटन्ति॥

१२ . तेषां शब्दं श्रुत्वा के किं कुर्वन्ति ?

कुक्कुटानां शब्दं श्रुत्वा केचित् जनाः शयनादु त्थाय स्वीयेषु कर्मसु प्रवर्तन्ते।

१३.	कुक्कुटाः किं कुर्वन्तः वेलां बोधयन्ति ?

कुक्कुटाः रात्रौ यामे यामे विरुवन्तः वेलां बोधयन्ति।

**ख)** तथापि, प्रभृति, प्रायेण, अत्रान्तरे, स्वयमेव, - - एतैः यथायोगं वाक्यानि पूरयत।

१. - - - सर्वे वृक्षाः वसन्तमासे पुष्पयन्ति।

प्रायेण सर्वे वृक्षाः वसन्तमासे पुष्पयन्ति।

२. द्वौ बालौ कलहं कर्तुमारभेताम्, - - - - उपाध्यायः आगच्छत्।

द्वौ बालौ कलहं कर्तुमारभेताम्, अत्रान्तरे उपाध्यायः आगच्छत्।

३. धेनवः केवलं तृणानि भक्षयन्ति, - - - - मधुरं क्षीरं यच्छन्ति च।

धेनवः केवलं तृणानि भक्षयन्ति, तथापि मधुरं क्षीरं यच्छन्ति च।

४. बाल्यात् - - - - अहं तव मित्रमस्मि।

बाल्यात् प्रभृति अहं तव मित्रमस्मि।

५. अजाः - - - - प्रचाराय गच्छन्ति प्रत्यागच्छन्ति च।

अजाः स्वयमेव प्रचाराय गच्छन्ति प्रत्यागच्छन्ति च।

**ग)** ' उद्धर्, उन्मील्, उत्तिष्ठ ' एतेषां लङ् रूपाणि वदत॥

**उद्धर् - लङ् रूपाणि**

लङ् उद् अ धर्

| | | | |
|---|---|---|---|
| प्र.पु. | उद्धरत् | उद्धरताम् | उद्धरन् |
| म.पु. | उद्धरः | उद्धरतम् | उद्धरत |
| उ.पु | उद्धरम् | उद्धराव | उद्धराम |

**उन्मील् - लङ् रूपाणि**

लङ् उन् अ मील्

| | | | |
|---|---|---|---|
| प्र .पु . | उनमीलत् | उनमीलताम् | उनमीलम् |
| म.पु . | **उनमीलः** | **उनमीलतम्** | **उनमीलत** |
| उ .पु . | उनमीलम् | उनमीलाव | उनमीलाम |

उत्तिष्ठ - लङ् रूपाणि

लङ् उत् अ तिष्ठ (उदतिष्ठ)

| | | | |
|---|---|---|---|
| प्र.पु. | उदतिष्ठत् | उदतिष्ठताम् | उदतिष्ठन् |
| म.पु. | उदतिष्ठः | उदतिष्ठतम् | उदतिष्ठत |
| उ.पु. | उदतिष्ठम् | उदतिष्ठाव | उदतिष्ठाम |

**घ)** अस्मिन् पाठे शतृप्रत्ययान्तान् वदत ।

विकिरन् विकिरन्तौ विकिरन्तः (spreading)

क्रोशन् क्रोशन्तौ क्रोशन्तः (shrieking )

वदन् वदन्तौ वदन्तः (saying, speaking)

विरुवन् विरुवन्तौ विरुवन्तः (विरुवन्तो)

**ङ)** संखेय शब्दाः (**Ordinals**) (प्रथमैक वचने रूपाणि)

| | | | | |
|---|---|---|---|---|
| **पुंसि** (*masculine*) | प्रथमः | द्वितीयः | यृतीयः | चतुर्थः |
| **स्त्रियाम्** (*feminine*) | प्रथमा | द्वितीया | तृतीया | चतुर्थी |
| **क्लीषे** (*neuter*) | प्रथमं | द्वितीयं | तृतीयं | चतुर्थं |

## शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

कुक्कुटः ***m*** cock

उच्चै, तारं = ***in.*** loud

प्रातस्तरां ***in.*** in the early morning

पूर्वं ***in.*** before

कुक्कुटी ***f*** hen

शाबकाः *m* young ones (chicks)

ताम्रा *a. f.* red

चूडा ***f*** crest

रम्यः ***a. m.*** charming

धूसरः ***a. m.*** grey

पर्यटन्ति ***P.*** go about (*pl.*)

अवकरः *m* (अवकरान् *pl.*) sweeping(s) of grain etc.

विकिरन्तो (विकिरन्तः) spreading

अन्विष्यन्ति ***P.*** search (*pl.*)

उद्धरन्ति ***P.*** pick up (*pl.*)

प्रबुध्यन्ते ***A.*** get up

प्रभाता ***f*** became clear

रजनिः ***f*** night

प्रत्यूष ***m. n.*** dawn

चक्षुः *n* an eye

उन्मीलयत ***P.*** (you) open

कवाटः ***m*** a door

यामः ***m*** one eighth of a day

वेला ***f*** time

प्र-बोधयन्ति *P.* inform (to make others wakeup)